श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वादिराजयति कृतं

# ॥ श्री श्रीशगुणदर्पणस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीशगुणदर्पणस्तोत्रम् ॥

या सुगन्धास्यनासादिनवद्वाराऽखिलेन या।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ॥ 1 ॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ 2 ॥

मातर्लक्ष्मि नमस्तुभयं माधवप्रियभामिनि।
युवां विश्वस्य पितरावितरेतरयोगिनौ ॥ 3 ॥

समना किल मातस्त्वममुना तदयोगिनी।
मम नाथेन नैव स्या विमनाश्च न स त्वयि ॥ 4 ॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः।
त्वं मूलप्रकृतिर्देवी स दिव्यपुरुषः किल ॥ 5 ॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ॥ 6 ॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः।
युवां युवानौ सततं युवयोर्न वयोऽधिकः ॥ 7 ॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा।
पद्मद्वयकरा पद्मकोशाभस्तनशोभना ॥ 8 ॥

पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ॥ 9 ॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम्।
बिम्बाधरोष्ठीं कस्तूरीजम्बालतिलकां भजे॥ **10**॥

रत्नोद्दीप्तसुमाङ्गल्यसूत्रावृतशिरोधराम्।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम्॥ **11**॥

कुचकञ्चुकसञ्चारिहारानीकमनोहराम्।
काञ्चीकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम्॥ **12**॥

सुवर्णमण्डपे रत्नचित्रसिंहासनोत्तमे।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम्॥ **13**॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः।
यां पूजयन्ति सेवन्ते सा मां पातु रमा सदा॥ **14**॥

सर्वालङ्कारभरितौ सर्वसद्गुणमण्डितौ।
शर्वादिसर्वभक्तौघसर्वसम्पद्विधायकौ॥ **15**॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः॥ **16**॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेःप्रिया॥ **17**॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम्।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम्॥ **18**॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम्।
इमं स्तवं पठन् मर्त्यः श्रीमान् स्यान्नात्र संशयः॥ **19**॥

॥ श्री श्रीशगुणदर्पणस्तोत्रं समाप्तम्॥